# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**–आचार्य (SEM-3) | **प्रश्नपत्रम्**–४ (New & Old) | **गुणाः** – ७० |
| **विषयः** – पुराणेतिहासः | **कोड- CE- 5-3-9** | **समयः** – १० तः १ |
| **दिनाङ्कः** – ०७/१२/२०१८ | **सन्दर्भग्रन्थः**– भागवते द्वादशस्कन्धः, सत्यनाारायणव्रतकथा, नारदभक्तिसूत्रम्। | |

**॥ प्रथमान्वितिः ॥**

**प्र–१ एकस्य ससन्दर्भं व्याख्या कार्या।** **०५**

१. पुराणसंहितामेतामृषिर्नारायणोऽव्ययः।
नारदाय पुरा प्राह कृष्णद्वैपायनाय च॥

२. सर्गोऽस्याथ विसर्गश्च वृत्ति रक्षान्तराणि च।
वंशो वंशानुचरितं संस्था हेतुरपाश्रयः॥

**प्र–२ कस्याप्येकस्य वर्णनं कुरुत।** **१०**

१. कलियुगस्य राजवंशानुवर्णनम्।

२. परीक्षितः परमगतिः।

**॥ द्वितीयान्वितिः ॥**

**प्र–३ कस्याप्येकस्य ससन्दर्भं व्याख्या कार्या।** **०५**

१. देवता मुनयः सिद्धाः पितरौ मनवो नृपाः।
गच्छन्ति कामान् गृणतः श्रृण्वतो यस्य कीर्तनात्॥

२. व्रजस्त्रीणां विलापश्च मथुरालौकनं ततः।
गजमुष्टिकचाणूरकंसादीनां च यो वधः॥

**प्र–४ एकस्य सारो देयः।** **१०**

१. कलियुगस्य धर्मः।

२. श्रीमद्भागवतमहिमा।

**॥ तृतीयान्वितिः ॥**

**प्र–५ एकस्य ससन्दर्भं व्याख्या कार्या।** **०५**

१. एकदा नारदो योगी परानुग्रहकांक्षया।
पर्यटन् विविधान् लोकान् मर्त्यलोकमुपागतः॥

२. जितेन्द्रिय सत्यवादी ययौ देवालयं प्रति।
दिने दिने धनं दत्वा द्विजान् संतोषयन् सुधीः॥

**प्र-६ एकस्य उत्तरं लिखत । १०**

१. श्रीसत्यनारायणकथायाः महत्त्वं प्रतिपादयत ।

२. श्रीसत्यनारायणकथायाः चतुर्थाध्यायस्य सारः ।

**प्र-७ एकस्य सूत्रस्य ससन्दर्भं व्याख्या कार्या । ०५**

१. स्वयं फलरूपचेति ब्रह्मकुमाराः ।

२. स तरति स लोकांस्तारयति ।

**॥ चतुर्थान्वितिः ॥**

**प्र-८ एकस्य समीक्षा कर्तव्या । १०**

१. भक्तिस्वरूपम् ।

२. भक्त्याः विभिन्नभेदाः ।

**प्र-९ दशप्रश्नानां लघूत्तराणि यच्छत । १०**

१. भीष्मपितामहस्य पितुर्नाम किम्?

२. का उपमा आत्मनः ?

३. भयभीतः तक्षकः कस्य शरणं गतः?

४. ओंकारस्य कति वर्णाः? के च ते?

५. नारदभक्तिसूत्रे कति सूत्राणि सन्ति?

६. भक्तेः कति भेदाः?

७. कः श्रेष्ठभक्तः ?

८. गौणी भक्तेः कति भेदाः?

९. प्रथम-अनुवाके कति सूत्राणि सन्ति?

१०. श्रीद्भागवतस्य द्वादशस्कन्धे कति अध्यायाः सन्ति?

११. कस्मिन् पुराणे सत्यनारायणदेवस्य कथाऽस्ति?

१२. तुङ्गध्वजस्य कति पुत्राः आसन्?

१३. सत्यनारायणकथायाः कति अध्यायाः सन्ति?

१४. स्वायंभुवमनोः पूर्वजन्मनः नाम किम्?

१५. सत्यनारायणकथायाः प्रथमाध्यायस्य प्रथमं श्लोकं लिखन्तु ।

--००--